# श्रीसंङ्कटनाशनगणेशस्तोत्रम्

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यमायु:कामार्थसिद्धये ।। 1।।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिंङ्गाक्षं गजवक्त्रं चतुर्थकम् ।।2।।
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं धूम्रवर्णं तथाष्टमम् ।।3।।
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ।।4।।
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नर:।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ।।5।।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ।।6।।
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ।।7।।
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ।।8।।

***इति श्रीनारदपुराणे गौरीहरसंवादे गणपति स्तोत्रं सम्पूर्णम् ।***

## श्री शंकटनाशन गणेश स्तोत्रं पाठ से लाभ

श्री शंकटनाशन गणेश स्तोत्र पाठ करने से छः मास में इच्छित फल की प्राप्ति होती है एक वर्ष में पूर्ण सिद्धियाँ प्राप्त हो जाती है और जो विद्यार्थी विद्या प्राप्त करना चाहता है वह अपने द्वारा लिखकर आठ ब्राह्मणों को दान करता है तो उन्हें गणेश जी की कृपा से तुरन्त विद्या की प्राप्ति होती है।